मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रिया-
स्तथा ।
ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन् ॥
चातुर्वर्ण्यं ततो दृष्ट्वा आश्रमस्थान् सुतांस्ततः ।
एवं प्रतिष्ठितं तीर्थं ब्रह्मयोनीतिसंज्ञितम् ॥
तत्र स्नात्वा मुक्तिकामः पुनर्योनिं न पश्यति ।"
इति वामनपुराणे ३८ अध्यायः ॥

ब्रह्मरन्ध्रं, क्ली, (ब्रह्मणः परमात्मनः अधिष्ठानाय रन्ध्रं आकाशः यद्वा, ब्रह्मणो ब्रह्मप्राप्तये रन्ध्रम् । एतद्रन्ध्रेण प्रायोत्क्रमणे ब्रह्मलोकप्राप्तिरस्य तथात्वम् ।) उत्तमाङ्गम् । ब्रह्मतालु इति भाषा । यथा । ओं नमः ब्रह्मरन्ध्रे । इति तन्त्रसारः ॥ अपि च । ब्रह्मरन्ध्रसरसीरुहोदरे इत्यादि गुरुपादुकास्तोत्रम् ॥ (यथा च हठयोगप्रदीपिकायाम् । ४ । १६ ।
"ज्ञात्वा सुषुम्णासद्भेदं कृत्वा वायुञ्च मध्यगम् ।
स्थित्वा सदैव सुस्थाने ब्रह्मरन्ध्रे निरोधयेत् ॥")

ब्रह्मरात्रः, पुं, (रात्रेरयं रात्रः । ब्रह्मणो रात्रः ।) ब्राह्ममुहूर्त्तः । इति श्रीधरस्वामी ॥ यथा,—
"ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः ।
अनिच्छन्त्यो ययुर्गोप्यः स्वगृहान् भगवत्प्रियाः ॥"
इति श्रीभागवते । १० । ३३ । ३९ ॥

ब्रह्मरातिः, पुं, याज्ञवल्क्यमुनिः । इति हेमचन्द्रः ॥ ब्रह्मज्ञानं राति ददाति यः । ब्रह्मशब्दात् राधातोर्णत्वेति क्तिप्रत्ययनिष्पन्नोऽयम् । इति तट्टीका ॥ ब्रह्मणो निशायां स्त्री । सा दैवसहस्रयुगेन भवति । इति पुराणम् ॥ (मनुष्यकालपरिमाणतो ब्रह्मणो रात्रिपरिमाणमुच्यते । नेत्रपरिस्पन्दनकालो निमेषः । अष्टादशनिमेषास्तु काष्ठा । त्रिंशत् काष्ठास्तु कला । त्रिंशत् कलास्तु क्षणः । क्षणास्तु द्वादश मिलित्वा एको मुहूर्त्तः ।
"तास्तु त्रिंशत्क्षणस्ते तु मुहूर्त्तो द्वादशास्त्रियाम् ॥"
इत्यमरः । १ । ४ । ११ ॥
मनुमते तु त्रिंशत्कला मिलिता एको मुहूर्त्तः स्यात् यदुक्तं तत्रैव । १ । ६४ ।
"त्रिंशत्कला मुहूर्त्तः स्यादहोरात्रन्तु तावतः ॥"
ते त्रिंशन्मुहूर्त्ता एकोऽहोरात्रः । अहोरात्रास्तु पञ्चदशसंख्यका एकः पक्षः । पक्षस्तु शुक्लकृष्णभेदात् द्विविधः । ताभ्यामुभाभ्यां पक्षाभ्यां मासः स्यात् । मासस्तु पित्र्यो रात्राहनी । कृष्णपक्षस्तु पितॄणामहः शुक्लपक्षस्तु शर्व्वरी । षड्भिर्मासैरयनं भवेत् । अयनन्तु दक्षिणोत्तरभेदात् द्विविधम् । द्वाभ्यामयनाभ्यां वत्सरः स्यात् । वत्सरस्तु दैवे रात्राहनी । उत्तरायणं देवानामहः दक्षिणायनन्तु रात्रिः । मानुषाणां यत्सत्यादियुगचतुष्टयं तद्दैवं युगं ज्ञेयम् । एवं दैवयुगसहस्रेण ब्रह्मणोऽहः दैवयुगसहस्रेण च रात्रिर्भवति । तथा च मनौ । १ । ७१ । श्लोकस्य टीकायां कुल्लूकभट्टः ।
"विष्णुपुराणे मानुषचतुर्युगसहस्रेण ब्रह्माहःकीर्त्तनात्मानुषचतुर्युगेनैव दिव्ययुगानुगमनात् । तथा च विष्णुपुराणम् ।
"कृतं त्रेताद्वापरञ्च कलिश्चेति चतुर्युगम् ।
प्रोच्यते तत्सहस्रन्तु ब्रह्मणो दिवसो मुने ! ॥"
तथा च मनुः । १ । ६८-७३ ।
"ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः ।
एकैकशो युगानान्तु क्रमशस्तन्निबोधत ॥
चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥
यदेतत्परिसंख्यातमादावेव चतुर्युगम् ।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥
दैविकानां युगानान्तु सहस्रं परिसंख्यया ।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च ॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः ।
रात्रिञ्च तावतीमेव तेऽहोरात्रविदो जनाः ॥"
"यदेतदिति । एतस्य श्लोकस्यादौ यदेतन्मानुषं चतुर्युगं परिगणितं एतद्दैवानां युगमुच्यते । चतुर्युगशब्देन सन्ध्यासन्ध्यांशयोरप्राप्तिशङ्कायामाह एतद्द्वादशसाहस्रमिति स्वार्थेऽण् । चतुर्युगैरेव द्वादशसहस्रसंख्यैरिदं युगमिति तु मेधातिथेर्भ्रमो नादरणीयः मनुनानन्तरं दिव्ययुगसहस्रेण ब्राह्माहस्याभिधानात् ॥" इति तट्टीकायां कुल्लूकभट्टः ॥)

ब्रह्मराक्षसः, पुं, (आदौ ब्रह्मा ब्राह्मणः पश्चात् राक्षसः कुकर्म्मभिः राक्षसयोनिं गतः ।) भूतविशेषः । यथा,—
"संयोगं पतितैर्गत्वा परस्यैव च योषितम् ।
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः ॥"
इति मानवे । १२ । ६० ॥
(स च यज्ञविनाशकारी भूतयोनिगतत्वात् । यथा, रामायणे । १ । ११ । २१ ।
"शक्योऽवाप्तुमयं यज्ञो नाशक्तेन महीक्षिता ।
नचैवाश्रद्दधानेन न चाल्पद्रविणेन च ॥
छिद्रं हि मृगयन्त्यत्र यज्ञघ्ना ब्रह्मराक्षसाः ॥")
महादेवस्य गणविशेषः । यथा,—
"डाकिनीर्यातुधानांश्च वेतालान् सविनायकान् ।
भूतमातृपिशाचांश्च कुष्माण्डान् ब्रह्मराक्षसान् ॥"
इति श्रीभागवते बाणयुद्धे ६३ अध्यायः ॥
पारिभाषिकब्रह्मराक्षसाः । यथा,—
"मूर्खः क्ली कच्छपश्चैव वाजी बधिर एव च ।
गृहीतार्थं न मुञ्चन्ति पञ्चैते ब्रह्मराक्षसाः ॥"
इति व्यवहारप्रदीपः ॥

ब्रह्मरीतिः, स्त्री, (ब्रह्मवर्णा रीतिः ।) पित्तलभेदः । यथा, हेमचन्द्रः । ४ । ११४ ॥
"पित्तलारेऽथारकूटः कपिलोहं सुवर्णकम् ।
रिरी रीरी च रीतिश्च पीतलोहं सुलोहकम् ॥
ब्राह्मी तु राज्ञी कपिला ब्रह्मरीतिर्महेश्वरी ॥"
राजरीतिः । इति राजनिर्घण्टः ॥ (तथास्याः पर्य्यायान्तरम् ।
"पित्तलञ्चारकूटं स्यादारीरीतिश्च कथ्यते ।
राजरीतिर्ब्रह्मरीतिः कपिला पिङ्गलापि च ॥"
इति वैद्यकरत्नमालायाम् ।
ब्रह्मणो ब्राह्मणस्य रीतिश्च ॥)

ब्रह्मर्षिः, पुं, (ब्रह्मा ब्राह्मणः ऋषिः । यद्वा, ब्रह्म वेदं परब्रह्म वा ऋषति वेत्ति इति ।) वशिष्ठादिमुनिगणः । इति हेमचन्द्रः ॥ (यथा, रामायणे । १ । ६३ । २०—२१ ।
"ब्रह्मणस्तु वचः श्रुत्वा विश्वामित्रस्तपोधनः ।
प्राञ्जलिः प्रणतो भूत्वा प्रत्युवाच पितामहम् ॥
ब्रह्मर्षिशब्दमतुलं स्वार्जितैः कर्म्मभिः शुभैः ।
यदि मे भगवन्नाह ततोऽहं विजितेन्द्रियः ॥"
तथा च महाभारते । १३ । १६ । ३१ ।
"ततो वैश्रवणोऽथैत्य अष्टावक्रमनिन्दितम् ।
विधिवत् कुशलं पृष्ट्वा ततो ब्रह्मर्षिमब्रवीत् ॥")

ब्रह्मर्षिदेशः, पुं, (ब्रह्मर्षीणां देशः वासयोग्यस्थानम् ।) कुरुक्षेत्रादिदेशचतुष्टयम् । यथा,
"कुरुक्षेत्रञ्च मत्स्याश्च पाञ्चालाः शूरसेनकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः ।
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व्वमानवाः ॥
इति मानवे ।२ । १९-२० ॥

ब्रह्मलोकः, (ब्रह्मणो लोको भुवनम् ।) ब्रह्मणो भुवनम् । यथा,—
"सत्यस्तु सप्तमो लोको ह्यपुनर्भववासिनाम् ।
ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः ॥"
इति देवीपुराणम् ॥
अपि च ।
"षड्गुणेन तपोलोकात् सत्यलोको विराजते ।
अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः ॥"
अस्य टीका । जनलोकापेक्षयैव षड्गुणेन द्वादशको ह्युच्छ्रायेण तपोलोकानन्तरं सत्यलोकः । न तु तपोलोकात् षड्गुणेनेति मन्तव्यम् । तथासत्यष्टचत्वारिंशत्को ह्युच्छ्रायत्वेन ब्रह्माण्डे तस्यावकाशाभावात् । सूर्य्याण्डगोलयोरन्तः कोट्यः स्युः पञ्चविंशतिरिति शुकोक्तेः । सत्यलोक एव कक्षाभेदेन ब्रह्मधिष्ण्यात् परं वैकुण्ठलोकादि ज्ञेयम् । एवञ्च भूतलादूर्द्ध्वं पञ्चदशलक्षोत्तराष्टयोविंशतिकोट्यो भवन्ति । सत्यलोकादूर्द्ध्वञ्च पञ्चदशलक्षोनकोटिद्वयादण्डकटाह इति ज्ञेयम् । अपुनर्मारकाः पुनर्म्मृत्युशून्याः । इति विष्णुपुराणे । २ अं । ७ अः ॥ (ब्रह्मैव लोकः । तुरीयब्रह्मस्वरूपम् । यदुक्तं शतपथब्राह्मणे । १४ । ७ । १ । ३१ ।
"एषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति । स यो मनुष्याणां राद्धः समृद्धो भवति । अन्येषामधिपतिः सर्व्वैर्मानुष्यकैः कामैः सम्पन्नतमः स मनुष्याणां परम आनन्दः । अथ ये शतं मनुष्याणामानन्दाः । स एकः पितृणां जितलोकानामानन्दः । अथ ये शतं पितृणां जितलोकानामानन्दाः स एक